कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।

पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ १३.२१ ॥

kāryakāraṇakartṛtve hetuḥ prakṛtirucyate |
puruṣaḥ sukhaduḥkhānāṁ bhoktṛtve heturucyate || 13.21||

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।

कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ १३.२२ ॥

puruṣaḥ prakṛtistho hi bhuṅkte prakṛtijānguṇān |
kāraṇaṁ guṇasaṅgo'sya sadasadyonijanmasu || 13.22||

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।

परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥ १३.२३ ॥

upadraṣṭānumantā ca bhartā bhoktā maheśvaraḥ |
paramātmeti cāpyukto dehe'sminpuruṣaḥ paraḥ || 13.23||

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।

सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ १३.२४ ॥

ya evaṁ vetti puruṣaṁ prakṛtiṁ ca guṇaiḥ saha |
sarvathā vartamāno'pi na sa bhūyo'bhijāyate || 13.24||

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।

अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ १३.२५ ॥

dhyānenātmani paśyanti kecidātmānamātmanā |
anye sāṅkhyena yogena karmayogena cāpare || 13.25||